लीयते वेति” शारीरकसूत्रभाष्ये शङ्कराचार्य्यः।

**जीवोपाधि** पु० ६त०। १स्वप्नसुषुप्तिजाग्रदवस्थासु। त्रयो हि जीवस्योपाधयः। तत्र सुषुप्तौ बुद्ध्यादिसंस्कारवासितमज्ञानमात्रमुपाधिः। स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः। जाग्रदवस्थायां सूक्ष्मशरीरसंसृष्टं स्थूलशरीरमुपाधिरिति तत्तदुपाध्युपलक्षितसुषुप्त्यादेरप्युपाधित्वम्। “कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वर” इत्युक्तेः अज्ञानस्य २व्यष्टिशक्तिभेदे च तस्यास्तु समष्ट्यज्ञानकार्य्यत्वात् तदभिप्रायेणैव “मायोपाधिरयं जीवोऽह्यविद्योपाधिरीश्वरः” इत्यादौ मायाविद्ययोरभेदेऽपि भेदनिर्द्देशः।

**जीवोर्णा** स्त्री ६त०। जीवतो मेषादेरोमणि ‘पवित्रमस्मिन् करोति शुक्लं जीवोर्णानाम्” कात्या० श्रौ० ८। २।१६। “जीवन्मेषरोमनिर्म्मितसूत्रनिर्म्मितम्” कर्कः।

**जीव्या** स्त्री जीवाय हिता यत्। १हरीतक्याम् २जीवन्त्यां ३गोक्षुरदुग्धायाञ्च राजनि० ४जीवनोपाये त्रि० जीव्योपायं तु भगवान् मम किञ्चित् करोतु सः” हरिवं० २६२अ०।

**जु** रंहसि भ्वा० पर० अक० अनिट्। जवति। अजौषीत्। जुजाव। जवः जवनः। णिचि जावयति ते अजीजवत् त ततः सनि०जिजावयिषति। अस्य परस्मैपदित्वं गतिकर्म्मत्वञ्च निघण्टूक्तम् “जयति जवति” इत्युपक्रमे इत्येते गतिकर्माण इत्युक्तेः। वेदे गणव्यत्यासः “वृष्टिं ये विश्वे मरुतो जुनन्ति” ऋ० ५।५८।३। “येन न पातमपां जुनाम” १।१८६।५। अयं धातुः ऋ० भाष्ये सौत्र इति माधवः। दीर्घान्तोऽपि। “वातो न जूतः स्तनयद्भि रभ्रैः” ऋ०४।१७।१२।

**जु** गतौ सौ० आत्म० सक० अनिट्। जवते। अजोष्ट। जुजुवे। “यद्धि मनसा जवते तद्वाचा वदति” तैत्ति० स०६।१।७।२।

**जुग** त्यागे भ्वा०पर० सक० सेट् इदित्। जुङ्गति। अजुङ्गीत् जुजुङ्ग। कर्म्मणि इदित्त्वात् जुङ्ग्यते।

**जुगुप्सन** न० गुप–निन्दायां स्वार्थे सन्–भावे ल्युट्। १निन्दने अमरः। कर्त्तरि युच्। २निन्दाशीले त्रि०।

**जुगुप्सा** स्त्री गुप–निन्दायां स्वार्थे सन्–भावे अ टाप्। निन्दायाम् अमरः। सा च वीभत्सरसस्य स्थायिभावः शान्तरसव्यभिचारिभावश्च। यथोक्तं सा० द० “अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च” रसभेदे स्थायिभावभेदानुक्त्वा “दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा” तां लक्षयित्वा “शृङ्गारवीरयोर्हासोवीरे क्रोधस्तथा मतः। शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः” देहजुगुप्सा च शौचकार्य्यं यथोक्तं पात० सू० भा० “शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः” सू० “स्वाङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गी भवति किञ्च परैरसंसर्गः कायस्वभावावलोकी स्वमपि कायं जिहासुर्म्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमपश्यन् कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्यते” भा०। देहे जुगुप्सायां वैराग्यं भवति। तस्य निन्दनीयत्वे हेतुः विवेकचूड़ामणावुक्तो यथा “मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम्। पादोरुवक्षोभुजपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत्”। याज्ञवल्क्येन तु देहसंस्थितिमुपवर्ण्य “इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ” इत्युक्तं व्याख्यातं च मिता० “इतीदृशमस्थिरमपायाद्यारब्धमेतदशुचिनिधानं वर्ष्मास्थिरमिति यस्य बुद्धिरसौ कृती पण्डितो मोक्षाय समर्थो भवति वैराग्यस्य नित्यानित्यविवेकयोर्मोक्षोपायत्वात् अस्थिमूत्रपुरीषादिप्राचुर्य्यज्ञानस्य वैराग्यहेतुत्वात् अत एव व्यासः “सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः। शरीरकस्यापि कृते मूढ़ाः पापानि कुर्वते। यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत्। दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेदिति”। तस्मादीदृशकुत्सितशरीरस्यात्यन्तिकविनिवृत्त्यर्थमात्मोपासने प्रयतितव्यम्”।

**जुगुर्वणि** त्रि० गॄ–स्तुतौ यङ्लुकि क्विपि वेदे नि० वन–संभक्तौ इन्–णत्वम् ६त०। स्तोतॄणां संभक्तरि। “मन्द्रजिह्वा जुगुर्वणी” ऋ० १।१४२।८। [तत्रार्थे पु०।राजनि०।

**जुङ्ग** पु०जुगि–अच्। वृद्धदारकवृक्षे अमरः। ण्वुल्। जुङ्गक

**जुङ्गा** स्त्री जुगि–अच्। वृद्धदारकवृक्षे रमानाथः।

**जुटक** न० जट–संहतौ अच् संज्ञायां कन् पृषो०। जटायां शब्दर०। [ख्याते शिखाभेदे शब्दर०।

**जुटिका** स्त्री जट–संहतौ बा० कुन् पृषो०। (झुँटी)

**जुड** प्रेरणे चु० उभ०सक०सेट्। जोडयति ते अजूजुड़त् त।

**जुड** बन्धे (जोड़ादेओया)। तुदा०कुटा०पर० सेट्। जुड़ति